श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

विल्लूर् नडादूर् श्री श्रीनिधि स्वामिना विरचिता

# ॥ श्रीधनुष्पुरीश श्रीराजगोपालकृष्णस्वामि प्रपत्तिः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीधनुष्पुरीश श्रीराजगोपालकृष्णस्वामि प्रपत्तिः ॥

कविताजितकल्लोलिकन्यकाकान्तवक्षसे।
करुणादिगुणाढ्याय कमलानिधये नमः॥

श्रीचापपत्तनसदालयसुप्रतिष्ठौ
श्रीरुक्मिणीकरसरोरुहलालनीयौ।
श्रीवेदमौलिरमणीयमणीव मान्यौ
श्रीराजगोपचरणौ शरणं प्रपद्ये॥ १ ॥

भामाकरग्रहणकण्टकितौ मनोज्ञौ
सद्यः प्रफुल्लसरसीरुहकान्तिचोरौ।
साम्राज्यचिह्नपरिकर्मितमूलभागौ
श्रीराजगोपचरणौ शरणं प्रपद्ये॥ २ ॥

श्रीनन्दगेहकृतसङ्क्रमणौ जनन्याः
अग्रेकृताग्र्यनवनीतनवीननृत्तौ।
मञ्जीरशिञ्जितमनोहरतालतानौ
श्रीराजगोपचरणौ शरणं प्रपद्ये॥ ३ ॥

एतौ कथं नु मृदुलौ नवपल्लवाभौ
क्लृप्तातिघोरशकटासुरमर्दनौ ते।
इत्यादरेण जननीकरसम्प्रमृष्टौ
श्रीराजगोपचरणौ शरणं प्रपद्ये॥ ४ ॥

वेदावतंसमुनिमानसनन्दवास-
सञ्चारचारुसुकुमारतरौ सुमृष्टौ।
गोपाङ्गनाभिरभिरामकराङ्गुलीभिः
श्रीराजगोपचरणौ शरणं प्रपद्ये॥ ५ ॥

वज्रध्वजाङ्कुशसरोरुहशङ्खचक्र-
चिह्नैर्विचित्रितसदङ्गणगेहभागौ।
साश्चर्यभक्तिभरगोपसमीक्षितौ ते
श्रीराजगोपचरणौ शरणं प्रपद्ये॥ ६ ॥

कालीयमौलितलक्लृप्तविचित्रनृत्तौ
चित्रं तदीयमणिसन्ततिरञ्जितौ ते।
अन्यानवाप्यनिजचिह्नतदुत्तमाङ्गौ
श्रीराजगोपचरणौ शरणं प्रपद्ये॥ ७ ॥

प्रातर्विलोक्य मुनयस्सवितुस्सुताया-
श्चिह्नानि सैकतगतानि ययोः प्रहृष्टाः।
तामीरयन्ति भगवत्पदवाहिनीति
तौ राजगोपचरणौ शरणं प्रपद्ये॥ ८ ॥

हा! हन्त! हन्त! मृदुलौ मम तातपीडां
सन्ताडनैरकुरुतामिति जाम्बवत्या।
अङ्के निधाय करपल्लवलालितौ ते
श्रीराजगोपचरणौ शरणं प्रपद्ये॥ ९ ॥

याम्यां हि विष्णुपदभूषणकन्यकेयं
नित्यं विभाति परिभूषितसैकतेति।
आश्लिष्य तां वहति विष्णुपदी नदी सा
श्रीराजगोपचरणौ शरणं प्रपद्ये॥ १० ॥

प्रपत्तिरेषा प्रकृतौ स्थितानां
कृतैरघैरप्रकृतिं गतानाम्।
महौषधं मानिधिना वितीर्णं
श्रीराजगोपालकृपाबलेन॥ ११ ॥

॥ इति श्रीधनुष्पुरीश श्रीराजगोपालकृष्णस्वामि प्रपत्तिः समाप्ता ॥

www.prapatti.com